# Shri Dvinetrashambhustutih

# શ્રીદ્વિનેત્રશમ્ભુસ્તુતિઃ

## Document Information

Text title : dvinetrashambhustutiH

File name : dvinetrashambhustutiH.itx

Category : shiva, sachchidAnanda-shivAbhinava-nRisiMhabhAratI

Location : doc_shiva

Author : Sachchidananda Shivabhinava Nrisimha Bharati Swamigal

Proofread by : PSA Easwaran psawaswaran at gmail.com

Latest update : November 9, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

Shri Dvinetrashambhustutih

# શ્રીદ્વિનેત્રશમ્ભુસ્તુતિઃ

અવતારેઽસ્મિન્કામપ્રસક્ત્યભાવાદ્વિનેત્રત્વમ્ ।
અલમિતિ તાર્તીયં કિં નેત્રં શમ્ભુસ્તિરોધત્તે ॥ ૧॥

સમતાબોધાય નૃણાં પદપાથોજપ્રણમ્રાણામ્ ।
ગિરિશેનાદ્ય કૃપાતસ્ત્યક્તા વા વિષમલોચનતા ॥ ૨॥

અથવા કિં બોધયિતું વિકારહીનં પદં કૃપામ્ભોધે ।
વૈરૂપ્યં મા ભૂદિતિ સમલોચનતાં દધાસિ મે બ્રૂહિ ॥ ૩॥

દ્વે વિદ્યે શ્રુતિમધ્યે વેદ્યે પ્રોક્તે જનાનાં હિ ।
ઇમમર્થં બોધયિતું નેત્રદ્વન્દ્વં ગુરો ધત્સે ॥ ૪॥

બાહ્યં તથાન્તરં ચ દ્વન્દ્વં તમસો નિવારયિતુમ્ ।
અલમિતિ નેત્રદ્વન્દ્વં ધત્સે કિં યતિવર બ્રૂહિ ॥ ૫॥

નેતારો જગતાં કિલ વિખ્યાતૌ હરિહરૌ લોકે ।
તદુભયરૂપત્વાત્ત્વયિ નેત્રદ્વન્દ્વં ગુરો યુક્તમ્ ॥ ૬॥

સ્વાહાભાવાદસ્મિન્ સ્વાહાનાથો નિવૃત્તો યત્ ।
તસ્માન્નેત્રદ્વન્દ્વં શિષ્ટં યતિરૂપશઙ્કરે નૂનમ્ ॥ ૭॥

અજ્ઞાનતિમિરસંવૃતજનતતયે બોધનેત્રદાનેન ।
અવશિષ્ટા કિમુ ચાસ્મિન્નવતારે દ્વિનેત્રતા શમ્ભો ॥ ૮॥

ઇતિ શ ृ ઙ્ગેરિ શ્રીજગદ્ગુરુ શ્રીસચ્ચિદાનન્દશિવાભિનવનૃસિંહ-
ભારતીસ્વામિભિઃ વિરચિતા શ્રીદ્વિનેત્રશમ્ભુસ્તુતિઃ સમ્પૂર્ણા ।

Proofread by PSA Easwaran

*Shri Dvinetrashambhustutih*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*